# सार्थकशब्दानां त्रैविध्यविचारः

शब्दशक्तिप्रकाशिका ग्रन्थे सार्थकशब्दानां लक्षणं प्रदर्शितम् अस्ति, विभागोऽपि प्रदर्शितः —

शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत ।
प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा ॥

यादृशः शब्दः शब्दान्तरसहकारेणैव स्वार्थं अन्वियति द्वारा बोधजनकः तादृश शब्दत्वं सार्थकशब्दानां लक्षणं। घटशब्दः अंशब्द सहकारेण घटपदार्थं अन्वियति द्वारा घटनिष्ठ कर्मत्वं इत्याकारक बोधं जनयति इति घटशब्दे समन्वयः।

1) → घटम् आनय ।
2) → घट अम् ।
3) → घटः कर्मत्वम् ।
4) → घटनिष्ठकर्मत्वम् ।

एवमेव सुप्तिङादि प्रत्ययाः निपाताश्च शब्दान्तरसहकारेणैव स्वार्थं अन्वियति द्वारा शब्दबोधं जनयन्ति इति प्रकृतिषु प्रत्ययेषु निपातेषु च सार्थकशब्दस्य लक्षणस्य समन्वयः भवति। सार्थकशब्दाः त्रिविधाः प्रकृतिः, प्रत्ययः, निपातः इति। ननु शप्, श्यन्, प्रभृतिषु विकरणेषु आदि आगमेषु सार्थकशब्दत्वं अस्ति किन्तु प्रकृतिप्रत्यय निपातेषु तेषां अन्तर्भावः न भवति। तस्मात् चतुर्भिः सार्थकशब्दः स्वीकर्तव्यः इति चेत्। अत्रोच्यते चतुर्भिः सार्थकशब्दः न वक्तव्यः तथापि

पचतीत्यत्र पच धातु उत्तरं तिप् प्रत्यये सति शप् विकरणः भवति । स च सार्थोपस्थितिं न जनयति । पच धातोः स्वार्थः पाकः वर्तते । तिबादि तिप् प्रत्ययस्यापि स्वार्थः कर्तृत्वं कालः सङ्ख्या च वर्तते । तस्मात् शप् विकरणस्य सार्थकशब्दत्वं एव नास्ति । एवं दीव्यति दिव् धातु उत्तरं तिप् प्रत्यये सति श्यन् विकरणः भवति तस्यापि सार्थोपस्थिति जनकत्वं नास्ति केवलं धातु प्रत्यययोः एव स्वार्थ उपस्थिति जनकत्वं ।

प्रकृतिर्नाम

## प्रकृति द्वैविध्य विचारः

प्रकृतिः द्विविधा भवति - नामः धातु भेदेन । नाम एव प्रातिपदिकं इत्यपि उच्यते । प्रकृतेः लक्षणं ~~[illegible]~~ इत्थमविहितं -

स्वेतरार्थानवच्छिन्न स्वस्वार्थस्य अवबोधने ।
यत् शब्द निश्चयो हेतुः प्रकृति सा तदर्थिका ॥ इति ।

स्वस्वबहिर्भूतेतर संसर्गेण यादृशशब्दवत्तायाः निश्चयः स्वार्थान्वय भूतं प्रति हेतुः । तादृशत्वं प्रकृतिलक्षणं इति फलति । नाम्नि धातौ च उभयत्रापि अस्य प्रकृति लक्षणस्य समन्वयः भवति । तथाहि घटम् इत्यत्र घट इति नाम 'अम्' इति प्रत्ययः घटशब्दः अम् प्रत्ययार्थ कर्मत्वांशे स्वार्थस्य घटस्य अन्वयबोधं जनयति । भवतीत्यत्र 'भू' धातुः तिप् प्रत्ययः भू धातुः तिप् प्रत्ययार्थ आश्रयत्वे स्वार्थस्य उत्पादस्य अन्वयबोधं जनयति इति ।

## प्रत्ययस्य प्रत ~~लक्षणं अत्र~~

पदार्थान्तरेण अनवच्छिन्नस्यापि स्वार्थस्य सङ्ख्या काल इष्टसाधकस्यापि अन्वयबोधं जनयन्ति । अयता

प्रत्ययेषु नातिव्याप्ति। तथाहि चैत्र इत्यत्र सुप्रत्ययः इतरानवच्छिन्नं एकत्वं बोधयति। शब्दान्तर घटितक सुप् प्रत्यय निश्चयः तत्र नापेक्षितं। पचतीत्यत्र विद्यमानः तिङ् प्रत्ययः पदार्थान्तरेण अनवच्छिन्नं वर्तमानकालं बोधयति। शब्दान्तर तन्निमक तिङ् प्रत्यय निश्चयः तत्र न अपेक्षितं।
एवं यजेत इत्यत्र विद्यमानः लिङ् प्रत्ययः पदार्थान्तर अनवच्छिन्नं इष्टसाधनत्वं बोधयति। तत्रापि शब्दान्तर घटितक लिङ् प्रत्यय निश्चयः न अपेक्षितः।

(1) प्रत्ययानां (चातुर्विध्यं) लक्षणं

प्रत्ययानां लक्षणं शब्दशक्तिप्रकाशिकायां प्रदर्शितं।
धातुशब्दे प्रकृत्यर्थो निपातान्यश्च वृत्तिमान्। अतादृशार्थो शब्दः स्यात् प्रत्ययोऽसौ चतुर्विधः॥

प्रकृतिभिन्नत्वेसति निपातभिन्नत्वेसति शक्तिनिरूढलक्षणा अन्यतर वृत्तिमत्वं प्रत्ययस्य लक्षणं फलति। शक्तिनिरूढलक्षणा अन्यतरवृत्तिमत्वं घट, पट, शुक्ल, नीलादीनां नाम्नां अस्ति। भू, कृ प्रभृतीनां धातूनां अस्ति। समुच्चयादि प्रतिपादकानां चादि निपातानां अस्ति इति नाम, धातु, निपातेषु अतिव्याप्ति वारणाय प्रकृतिभिन्नत्वं निपातभिन्नत्वं च लक्षणे निवेशितं। मतुप् आदि प्रत्ययानां भूमनिन्दादि अर्थकत्वं अस्ति तदुक्तं

भूमनिन्दा प्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः॥ इति।

तस्मात् प्रत्ययेषु व्याकरणसमन्वयः।

## प्रत्ययानां चातुर्विध्यं

प्रत्ययाः चतुर्विधाः भवन्ति। सुपः, तद्धिताः, आख्याताः कृतः इति।

① तत्र आद्यः सुप् प्रत्ययः। स च एकविंशति विधः

सु औ जस्
अम् औट् शस्
टा भ्याम् भिस्
ङे भ्याम् भ्यस्
ङसि भ्याम् भ्यसः
ङस् ओस् आम्
ङि ओस् सुप् इति।

प्रातिपदिकेभ्यः (नामभ्यः) सुप् प्रत्ययाः विधीयन्ते यथा रामः, फलानि इत्यादि।

② तद्धित प्रत्ययः प्रातिपदिकेभ्यः विधीयते तद्धिताधिकारे पठिताः तद्धितप्रत्ययाः बहुविधाः भवन्ति। यथा दण्डवान् इत्यत्र दण्ड इति प्रातिपदिकात् मतुप् प्रत्ययः संसर्गार्थे विहितः

③ आख्यातप्रत्ययः धातोः विहिताः लकाराणां आदेशभूताः तिप् प्रत्ययाः आख्याताः इति उच्यन्ते। ते च तिप् प्रत्ययाः अष्टादश विधाः भवन्ति।

Scanned with CamScanner

तिप तस झि

सिप थस थ

मिप वस मस

ता आताम झ

थास आथाम ध्वम

इट् वहि मही

यथा भवती, भवत: भवन्ति, पच्यते पच्येते पच्यन्ते।

(4) कृत प्रत्यय: धातो: विहिता: तिङ् भिन्ना: प्रत्यया: कृत प्रत्यया: इति उच्यन्ते कृततिङ् इति पाणिनीय अनुशासनं सूत्रं, कृत प्रत्यया: बहुविधा: भवन्ति। कर्ता, हर्ता, भर्ता, नेता इत्यत्र तृच् प्रत्यय: कर्तरि अर्थे वर्तते। हरणं, करणं, गमनं, पठनं इत्यत्र ल्युट् प्रत्यय: भावे/करणे) अर्थे भवति। पाक:, पाठ:, हर: इत्यादौ घञ् प्रत्यय: भावे अर्थे वर्तते। गच्छन, पठन, कुर्वन इत्यत्र शतृ प्रत्यय: कर्तरि अर्थे वर्तते। सेव्यमान:, भाषमाण:, पचमान: इत्यत्र शानच् प्रत्यय: कर्तरि अर्थे वर्तते।

Scanned with CamScanner

## निपातलक्षणं

शब्दशक्तिप्रकाशिकायां निपातलक्षणं प्रदर्शितम् -

स्वार्थे शब्दान्तरार्थस्य तादात्म्येन अन्वयाक्षमः ।
सुबाद्यन्यो निपातोऽस्ति विविधश्चाति भेदतः ॥ इति ।

शब्दान्तरार्थस्य स्वार्थे तादात्म्येन अन्वयबोधं प्रति असमर्थत्वे सति सुबादि प्रत्ययत्वे भिन्नत्वे सति शब्दत्वं निपातस्य लक्षणं । चादयः निपाताः स्वार्थे समुच्चयादौ नामार्थस्य प्रत्ययार्थस्य च अभेदेन अन्वयबोधं प्रति असमर्थाः भवन्ति । यथा स्मृतं अनुभूतं च इत्यत्र स्मृतः समुच्चयः इति ज्ञानं न जायते किन्तु स्मृत अनुभूतयोः समुच्चयः इत्येव अनुभवो जायते ।

## वाक्यलक्षणं

वाक्यलक्षणं तावत् शब्दशक्तिप्रकाशिकायाम्
इत्थं अभिहितं मिथ साकाङ्क्ष शब्दस्य व्यूहोवाक्यं इति ।
अन्वयबोधं प्रति अनुकूलपरस्परं आकांक्षा शालि शब्दसमुदायः वाक्यस्य लक्षणं । यथा घटेन जलं आहरति इति शब्द समुदायः

तच्च वाक्यम् चतुर्विधं । तदुक्तं - सुबन्तं

सुबन्तं च तिङन्तं च सुबन्तैक समन्वितं ।
सुप्तिङन्त द्वयी गर्भं वाक्यमेतत् चतुर्विधं ॥ इति ।

वह्निना सिञ्चेत् इति अस्मिन् शब्दस्तोमे अन्वयानुकूलता आकाङ्क्षा शालित्वस्य विद्यमानात् वाक्यत्वम् अस्ति एव ।

योग्यत्वम् तु नास्ति। बाधितार्थ बोधकत्वात्। आहार्य शब्दबोध अंङ्गीकार पक्षे निर्वह्निः वह्निमान्, पचं न पचति इत्यादि शब्दस्तोमस्यापि वाक्यत्वं इष्यते तत्रोऽपि अन्वयबोधस्य जननात्। आहार्य शब्दबोध अङ्गीकारपक्षे तु निरूक्तशब्दस्तोमस्य वाक्यत्वम् नास्ति किन्तु अपार्थकत्वं।

## नाम्नां चातुर्विध्यं।


नाम धातु भेदेन द्विविधा प्रकृतिर्भवति तत्र नाम एव प्रातिपदिकं इत्यपि उच्यते। नाम्नः लक्षणं तावत् इत्थमविहितं येन स्वीय यदर्थस्य मुख्यतः प्रतिपादने स्वोत्तर प्रत्ययमपेक्ष्य तन्नामस्यात् तदर्थकम् इति। यादृशशब्देन स्वोपस्थाप्य मुख्यविशेष्यक अन्वयबोधजननाय स्वोत्तरप्रत्ययम। विभक्तिः अपेक्ष्यते तादृश शब्दत्वं नाम्नः लक्षणं।

घटादि शब्दाः प्रत्ययान्तत्वेन निश्चिताः एव (एकत्ववान् घटः इत्याकारक) स्वार्थ घटादि मुख्यविशेष्यकबोधं उत्पादयन्ति। नान्यथा इति समन्वयं। नाम्नां चातुर्विध्यं, रूढम्, लक्षकम्, योगरूढम्, योगिकम् चेति। तत्र अवयवशक्तिः योगः इति उच्यते। समुदायशक्तिः रूढि। क्वचिदर्थे रूढम् नाम गवादि। गो शब्दस्य सास्नादिमत्वावच्छिन्ने रूढिमत्वात् योगाभावात्। द्वितीयं लक्षकं नाम यदा गङ्गायां घोषः इत्यत्र वाक्ये गङ्गा शब्दः तृतीयं योगरूढम् नाम यथा 'पङ्कजम्' इति अत्र पङ्कजशब्दस्य पङ्कजनि कर्तरि पद्मे योगः रूढिं अपितर्ति

1 चतुर्थम् यौगिकम् नाम यथा पाचकः इति। पाचकशब्दः अवयवशक्त्या योगेन पाककर्तरि अर्थे प्रयुज्यते। पाचक इत्यत्र पच् धातोः पाके शक्तिः ण्वुल् प्रत्ययस्य कर्तरि शक्तिः।

रूढयौगिकम् इति पञ्चमं अपि नाम कैश्चित् अङ्गीकृतं। यथा मण्डपः इति। मण्डं पिबति इति व्युत्पत्या कदाचित् मण्डपानकर्तारं बोधयति मण्डपशब्दः कदाचित् च मण्डपशब्दः रूढ्या गृहविशेषं बोधयति। इत्थं योगेन रूढ्या च विभिन्न अर्थ बोधकत्वात् मण्डपशब्दः योगरूढः।

---




* रूढस्य उदाहरणं गोपदं।
* यौगिकस्य उदाहरणं पाचकः।
* योगरूढस्य उदाहरणं पङ्कजम्।
* लक्षकस्य उदाहरणं गङ्गायां घोषः इत्यत्र गङ्गापदं।

Scanned with CamScanner